## ॐ श्रीपरमात्मने नमः। अथ चतुर्थोऽध्यायः। ज्ञानकर्मसन्न्यासयोगः।

श्रीभगवानुवाच।
इमं विवस्वते योगम्   प्रोक्तवानहमव्ययम्।
विवस्वान्मनवे प्राह   मनुरिक्ष्वाकवेऽब्रवीत्॥ १॥

एवं परम्पराप्राप्तम्   इमं राजर्षयो विदुः।
स कालेनेह महता   योगो नष्टः परन्तप॥ २॥

स एवायं मया तेऽद्य   योगः प्रोक्तः पुरातनः।
भक्तोऽसि मे सखा चेति   रहस्यं ह्येतदुत्तमम्॥ ३॥

अर्जुन उवाच।
अपरं भवतो जन्म   परं जन्म विवस्वतः।
कथमेतद्विजानीयाम्   त्वमादौ प्रोक्तवानिति॥ ४॥

श्रीभगवानुवाच।
बहूनि मे व्यतीतानि   जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि   न त्वं वेत्थ परन्तप॥ ५॥

अजोऽपि सन्नव्ययात्मा   भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय   सम्भवाम्यात्ममायया॥ ६॥

यदा यदा हि धर्मस्य   ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य   तदात्मानं सृजाम्यहम्॥ ७॥

परित्राणाय साधूनाम्   विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय   सम्भवामि युगे युगे॥ ८॥

जन्म कर्म च मे दिव्यम्   एवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म   नैति मामेति सोऽर्जुन॥ ९॥

वीतरागभयक्रोधाः   मन्मया मामुपाश्रिताः।
बहवो ज्ञानतपसा   पूता मद्भावमागताः॥ १०॥

ये यथा मां प्रपद्यन्ते   तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते   मनुष्याः पार्थ सर्वशः॥ ११॥

काङ्क्षन्तः कर्मणां सिद्धिम्   यजन्त इह देवताः।
क्षिप्रं हि मानुषे लोके   सिद्धिर्भवति कर्मजा॥ १२॥

चातुर्वर्ण्यं मया सृष्टम्   गुणकर्मविभागशः।
तस्य कर्तारमपि माम्   विद्ध्यकर्तारमव्ययम्॥ १३॥

न मां कर्माणि लिम्पन्ति   न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति   कर्मभिर्न स बध्यते॥ १४॥

एवं ज्ञात्वा कृतं कर्म   पूर्वैरपि मुमुक्षुभिः।
कुरु कर्मैव तस्मात्त्वम्   पूर्वैः पूर्वतरं कृतम्॥ १५॥

किं कर्म किमकर्मेति   कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि   यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ १६॥

कर्मणो ह्यपि बोद्धव्यम्   बोद्धव्यं च विकर्मणः।
अकर्मणश्च बोद्धव्यम्   गहना कर्मणो गतिः॥ १७॥

कर्मण्यकर्म यः पश्येत्   अकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु   स युक्तः कृत्स्नकर्मकृत्॥ १८॥

यस्य सर्वे समारम्भाः   कामसङ्कल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणम्   तमाहुः पण्डितं बुधाः॥ १९॥

त्यक्त्वा कर्मफलासङ्गम्   नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि   नैव किञ्चित्करोति सः॥ २०॥

निराशीर्यतचित्तात्मा   त्यक्तसर्वपरिग्रहः।
शारीरं केवलं कर्म   कुर्वन्नाप्नोति किल्बिषम्॥ २१॥

| | |
|---|---|
| यदृच्छालाभसन्तुष्टः द्वन्द्वातीतो विमत्सरः।<br>समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते॥२२॥ | श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप।<br>सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥३३॥ |
| गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।<br>यज्ञायाचरतः कर्म समग्रं प्रविलीयते॥२३॥ | तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।<br>उपदेक्ष्यन्ति ते ज्ञानम् ज्ञानिनस्तत्त्वदर्शिनः॥३४॥ |
| ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम्।<br>ब्रह्मैव तेन गन्तव्यम् ब्रह्मकर्मसमाधिना॥२४॥ | यज्ज्ञात्वा न पुनर्मोहम् एवं यास्यसि पाण्डव।<br>येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥३५॥ |
| दैवमेवापरे यज्ञम् योगिनः पर्युपासते।<br>ब्रह्माग्नावपरे यज्ञम् यज्ञेनैवोपजुह्वति॥२५॥ | अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।<br>सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥३६॥ |
| श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।<br>शब्दादीन्विषयानन्ये इन्द्रियाग्निषु जुह्वति॥२६॥ | यथैधांसि समिद्धोऽग्निः भस्मसात्कुरुतेऽर्जुन।<br>ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥३७॥ |
| सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।<br>आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते॥२७॥ | न हि ज्ञानेन सदृशम् पवित्रमिह विद्यते।<br>तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥३८॥ |
| द्रव्ययज्ञास्तपोयज्ञाः योगयज्ञास्तथापरे।<br>स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः॥२८॥ | श्रद्धावाँल्लभते ज्ञानम् तत्परः संयतेन्द्रियः।<br>ज्ञानं लब्ध्वा परां शान्तिम् अचिरेणाधिगच्छति॥४०॥ |
| अपाने जुह्वति प्राणम् प्राणेऽपानं तथापरे।<br>प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥२९॥ | अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।<br>नायं लोकोऽस्ति न परः न सुखं संशयात्मनः॥४०॥ |
| अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति।<br>सर्वेऽप्येते यज्ञविदः यज्ञक्षपितकल्मषाः॥३०॥ | योगसन्न्यस्तकर्माणम् ज्ञानसञ्छिन्नसंशयम्।<br>आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय॥४१॥ |
| यज्ञशिष्टामृतभुजः यान्ति ब्रह्म सनातनम्।<br>नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम॥३१॥ | तस्मादज्ञानसम्भूतम् हृत्स्थं ज्ञानासिनात्मनः।<br>छित्त्वैनं संशयं योगम् आतिष्ठोत्तिष्ठ भारत॥४२॥ |
| एवं बहुविधा यज्ञाः वितता ब्रह्मणो मुखे।<br>कर्मजान्विद्धि तान्सर्वान् एवं ज्ञात्वा विमोक्ष्यसे॥३२॥ | |

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
ज्ञानकर्मसन्न्यासयोगो नाम चतुर्थोऽध्यायः॥
श्रीकृष्णार्पणमस्तु ॥